इहमनुः ।
“यदि स्यात् क्लिन्नवासा वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां कुशोपरि समाहितः ॥”
व्यासः ।
“जपकाले न भाषेत व्रतहोमादिकेषु च ।
एतेष्वेवावसक्तस्तु यद्यागच्छेत् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्त्तयेत् ॥”
योगियाज्ञवल्क्यः ।
“यदि वाग्यमलोपः स्यात् जपादिषु कदाचन ।
व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥”
गोतमः ।
“क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं वनितानाञ्च वर्ज्जयेज्जपकर्म्मणि ।
आचामेत् सम्भवे चैषां स्मरेद्विष्णुं सुरार्च्चितम् ॥”
बौधायनः ।
“नाभेरधश्च संस्पर्शं कर्म्मकाले विवर्ज्जयेत् ॥”
इत्याह्निकाचारतत्त्वम् ॥ * ॥
मन्त्रशब्दस्य व्युत्पत्तिर्यथा,—
“मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः ॥”
मन्त्रदीक्षारहितानां दोषो यथा, मत्स्यसूक्ते ।
“अदीक्षितानां मर्त्यानां दोषं शृणु वरानने ! ।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम् ।
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम् ॥”
शूद्रस्य मन्त्रविशेषनिषेधमाह तन्त्रे ।
“प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्म्मन्त्रं मन्त्रं चाजपसंज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ॥”
स्मृतिरपि ।
“सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति ।
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधो गच्छति ।”
विशेषमाह वाराहीये ।
“गोपालस्य मनुर्देयो महेशस्य तु पार्व्वति ।
तत्पत्न्याश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा ॥
सर्व्वो दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत् ॥”
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दवृन्दावने ।
“अदीक्षितस्य मरणे प्रेतत्वं न च मुञ्चति ॥”
नवरत्नेश्वरे ।
“सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम् ।
अविरोधाद्भवन्त्येव प्राणश्चित्यस्तु भक्तयः ॥”
तथा ।
“उपपातकलक्षाणि महापातककोटयः ।
क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता ॥”
अथाप्यनुकूलमन्त्रं दीक्षेत ।
“स्ववाररराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥”
वाराहीये ।
“ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत् ॥”
इति प्राधान्यतया बोध्यम् ॥
तथा च ।
“ध्वनिमन्त्रन्तु गृह्णीयादनुकूलन्तथैव च ।”
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
“तत्र नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥”
मालामन्त्रस्तु वाराहीये ।
“विंशत्यर्णाधिका मन्त्रा मालामन्त्राश्च कीर्त्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत् ॥
तथा । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति ! ।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥”
तथा चामुण्डातन्त्रे ।
“काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ॥
सिद्धविद्यातया नात्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखसाध्यं कथञ्चन ॥”
पृथिव्यां पूर्णफलप्रदा महाविद्या । यथा, मालिनीविजये ।
“अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फलैः सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली वाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः
तथा चैता महाविद्याः कलिदोषान्न बाधिताः ॥”
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रशंसापरम् । सर्व्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिद्वैरिमन्त्रस्य स्वप्नादौ प्राप्त्या तत्तद्दोषस्य दृष्टत्वात् । इति तु साम्प्रदायिकाः ॥ * ॥ मन्त्रोद्धारार्थषट्चक्रप्रमाणानि चक्रशब्दे द्रष्टव्यानि । तेषां लेखनप्रकारा यथा,

कुलाकुलचक्रम् ।

| वायुः | अग्निः | भूमिः | जलम् | आकाशः |
|---|---|---|---|---|
| अ आ | इ ई | उ ऊ | ऋ ॠ | ऌ ॡ |
| ए | ऐ | ओ | औ | अं |
| क | ख | ग | घ | ङ |
| च | छ | ज | झ | ञ |
| ट | ठ | ड | ढ | ण |
| त | थ | द | ध | न |
| प | फ | ब | भ | म |
| य | र | ल | व | श |
| ष | क्ष | ळ | स | ह |
| वायुः | अग्निः | भूमिः | जलम् | आकाशः |

अकथहचक्रम् ।

| | | | | |
|---|---|---|---|---|
| अ क<br>थ ह | उ<br>ङ प | | आ<br>ख द | ऊ<br>च फ |
| ओ<br>ड व | ऌ<br>झ म | | औ<br>ढ श | ॡ<br>ज य |
| ई<br>घ न | ऋ<br>ञ भ | | इ<br>ग ध | ॠ<br>छ ब |
| अः<br>त स | ऐ<br>ठ ल | | अं<br>ण ष | ए<br>ट र |